४आत्मनि। "सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः" इति छ०उ०। "आङ्गिरस आत्मा कार्य्यकरणानाम् कथमाङ्गिरसः!। प्रसिद्धं हि यदङ्गिनामङ्गानां रसत्वं तदपायेशोषप्राप्तेरिति वक्ष्यामः यस्माच्चायमङ्गिरसत्वात् विशेषानाश्रयत्वाच्च कार्य्यकरणानां साधारण आत्मा विशुद्धश्च तस्मात् वागादीनपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थः" शं०भा०।

**आङ्गिरसेश्वर** पु० आङ्गिरसेन प्रतिष्ठितः ईश्वरः। काशीक्षेत्रस्थे आङ्गिरसप्रतिष्ठिते शिवलिङ्गभेदे।

**आङ्गुरि(लि)क** पु० अङ्गुलि (रि) व इवार्थे कन्। वा रत्वम्। अङ्गुल्याकृतौ पदार्थे।

**आङ्गूष** पु० अङ्गति गच्छति देवान् अगि–ऊषच् अङ्गूषः ततः स्वार्थे अण्। स्तोत्रे। "तिरः पुरू चिदश्विना रजांस्याङ्गूषः" ऋ०२,५८,५। "आङ्गूषं स्तोत्रम्" भा०। "प्रमन्महे शवसानाय शूषमाङ्गूषम्" यजु०३४,१६। "अस्मा इदुप्रय इव प्रयंसि भराम्याङ्गूषं बाधे सुवृक्ति" ऋ० १,६१,२। [भवसन्निकृष्टदेशादौ।

**आङ्ग्य** त्रि०अङ्गे भवः आङ्गः चतरर्थ्यां संकाशा०यत्। अङ्ग-

**आचके** अव्य०आ+चक ए–विभक्तिप्रतिरूपकम्। कामनायाम् निरु०। "त्वामवस्युराचके" यजु० २१,१। आचके कामये" वे०दी०। "रुद्रातुरुद्रोवसुभिराचके"य०४,२१।

**आचक्षाण** त्रि० आ+चक्ष–शानच्। आख्यानं कुर्व्वति।

**आचतुर** अव्य० चतुःपर्य्यन्तम् अव्ययी० अच् समा०। चतुःपर्य्यन्ते "आचतुरं हीमे पशवोद्वन्द्वं मिथुनायन्ते"। माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेण "तत्पुत्रादिनापीति मर्य्यादार्थः" सि०कौ०।

**आचक्षुस्** त्रि० आ+चक्ष–बा० उसि। आख्यानकर्त्तरि।

**आचतुर्य्य** न०अचतुरस्य भावः "न नञ्पूर्व्वात् इत्यादि" पा० सू०चतुरादिपर्य्युदासात् भावे ष्यञ् प्रत्ययः। अनैपुण्ये

**आचम** पु० आ+चम–घञ् वा ह्रस्वः। आचमनशब्दार्थे "दृश्ना सह पलैकन्तु शुद्धं वारि तथाचमे" तन्त्रसा०।

**आचमन** न०आ+चम–भावे ल्युट्। १जलादेः पाने स्मृत्युक्ते कर्म्माङ्गे २कर्त्तृसंस्कारके ३क्रियाभेदे च, आ०तत्त्वे "आचमने उदकग्रहणप्रकारपरिमाणञ्चाह भरद्वाजः। 'आयतं पर्वणां कृत्वा गोकर्णाकृतिमत्करम्। संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः। मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनं चरेत्। माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः'। पाणिना दक्षिणेन "त्रिःपिबेद्-

क्षिणेनापः" इति आदिपुराणोक्तेः। मार्कण्डेयः। "सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम्। नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत्'। मदनपारिजाते हारीतः। 'ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेत्'। ग्रन्थना ग्रन्थिरिति समुद्रकरोऽपि। आचमनानुवृत्तौ देवलः। 'न गच्छन् न शयानश्च न क्रमन् न परान् स्पृशन्। न हसन् नैव संजल्पन् नात्मानञ्चैव वीक्षयन्'। क्रमन् कम्पमान इति रत्नाकरः। आत्मानं आत्मस्थानं हृदयं वीक्षयन् इति स्वार्थे णिच्। नेत्यनुवृत्तौ। 'केशान्नीवीमधःकायं संस्पृशन् धरणीमपि। यदि स्पृशति चैतानि भयः प्रक्षालयेत् करम्"। अधःकायं नाभेरधः प्रदेशम्। करं दक्षिणम्। आचमनानुवृत्तौ गोभिलः। 'नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम्" इति। अन्तरीयमधःपरिधानं तदेकदेशेन उत्तरीयं कृत्वा। मरीचिः। 'न बहिर्जानुस्त्वरया नासनस्थो नचोत्थितः। न पादुकास्थो नाचित्तः शुचिः प्रयतमानसः। उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः। भुक्त्वासनस्थोऽप्याचामेत् नान्यकाले कदाचन"। जलस्थलोभयकर्म्मानुष्ठानार्थं जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः। 'अन्तरुदके आचान्तोऽन्तरेव पूतोबहिरुदके आचान्तो बहिरेव शुद्धो भवति तस्मादन्तरेकं बहिरेकं च पादं कृत्वा आचामेत् सर्वत्र शुद्धो भवति" इति। जानुनजङ्घे जलेषु तिष्ठन्नेवाचामेत्। 'जानोरूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात्। अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्यति" इति विष्णूक्तेः। हारीतः। "आर्द्रवासा जले कुर्य्यात् तर्पणाचमनं जपम्। शुष्कवासा स्थले कुर्य्यात् तर्पणाचमनं जपम्। कात्यायनः। 'स्नानमाचमनं होमं भोजनं देवतार्च्चनम्। प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्। आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा। कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते"। आसनरूढ़पादः आसनारूढपादतलः। जानुनोर्जङ्घयोः कृतावसक्थिकः वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः तद्वयेन भेदप्रतीतेः। अत्र च "अनेको द्वाह्रे दारुशिले भूमिसमे इष्टकास्य संकीर्णभूता" इति बौधायनवचनात् तथाविधपादोऽपि कुर्य्यात्। व्यासः। "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा। अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्। अपः पाणिनखाग्रेषु आचामेद्यस्तु वै द्विजः। सुरापाणेन तत्तुल्यमित्येवम्हषिरब्रवीत् संदेहेति"। मुखं संवृत्य अलोम-